ક્રીડન્નાત્મવિહારૈશ્ચ સર્વાત્મા પ્રાવિશદ્વ્રજમ્ ॥ ૨૦॥

તત્તદ્વત્સાન્ પૃથઙ્નીત્વા તત્તદ્ગોષ્ઠે નિવેશ્ય સઃ ।
તત્તદાત્માભવદ્રાજંસ્તત્તત્સદ્મ પ્રવિષ્ટવાન્ ॥ ૨૧॥

તન્માતરો વેણુરવત્વરોત્થિતા
ઉત્થાપ્ય દોર્ભિઃ પરિરભ્ય નિર્ભરમ્ ।
સ્નેહસ્નુતસ્તન્યપયઃસુધાસવં
મત્વા પરં બ્રહ્મ સુતાનપાયયન્ ॥ ૨૨॥

તતો નૃપોન્મર્દનમજ્જલેપના-
લઙ્કારરક્ષાતિલકાશનાદિભિઃ ।
સંલાલિતઃ સ્વાચરિતૈઃ પ્રહર્ષયન્
સાયં ગતો યામયમેન માધવઃ ॥ ૨૩॥

ગાવસ્તતો ગોષ્ઠમુપેત્ય સત્વરં
હુઙ્કારઘોષૈઃ પરિહૂતસઙ્ગતાન્ ।
સ્વકાન્સ્વકાન્વત્સતરાનપાયય-
ન્મુહુર્લિહન્ત્યઃ સ્રવદૌધસં પયઃ ॥ ૨૪॥

ગોગોપીનાં માતૃતાસ્મિન્ સર્વા સ્નેહર્ધિકાં વિના ।
પુરોવદાસ્વપિ હરેસ્તોકતા માયયા વિના ॥ ૨૫॥

વ્રજૌકસાં સ્વતોકેષુ સ્નેહવલ્લ્યાબ્દમન્વહમ્ ।
શનૈર્નિઃસીમ વવૃધે યથા કૃષ્ણે ત્વપૂર્વવત્ ॥ ૨૬॥

ઇત્થમાત્માઽઽત્મનાઽઽત્માનં વત્સપાલમિષેણ સઃ ।
પાલયન્ વત્સપો વર્ષં ચિક્રીડે વનગોષ્ઠયોઃ ॥ ૨૭॥

એકદા ચારયન્ વત્સાન્ સરામો વનમાવિશત્ ।
પઞ્ચષાસુ ત્રિયામાસુ હાયનાપૂરણીષ્વજઃ ॥ ૨૮॥

તતો વિદૂરાચ્ચરતો ગાવો વત્સાનુપવ્રજમ્ ।
ગોવર્ધનાદ્રિશિરસિ ચરન્ત્યો દદૃશુસ્તૃણમ્ ॥ ૨૯॥

દૃષ્ટ્વાથ તત્સ્નેહવશોઽસ્મૃતાત્મા
સ ગોવ્રજોઽત્યાત્મપદુર્ગમાર્ગઃ ।
દ્વિપાત્કકુદ્ગ્રીવ ઉદાસ્યપુચ્છો-
ઽગાદ્ધુઙ્કૃતૈરાસ્રુપયા જવેન ॥ ૩૦॥

મુખાદ્વમન્ રુધિરમપસ્મૃતોઽસુરઃ ।
મહારવં વ્યસુરપતત્સમીરયન્
ગિરિર્યથા મઘવત આયુધાહતઃ ॥ ૨૯॥

દૃષ્ટ્વા પ્રલમ્બં નિહતં બલેન બલશાલિના ।
ગોપાઃ સુવિસ્મિતા આસન્ સાધુ સાધ્વિતિ વાદિનઃ ॥ ૩૦॥

આશિષોઽભિગૃણન્તસ્તં પ્રશશંસુસ્તદર્હણમ્ ।
પ્રેત્યાગતમિવાલિઙ્ગ્ય પ્રેમવિહ્વલચેતસઃ ॥ ૩૧॥

પાપે પ્રલમ્બે નિહતે દેવાઃ પરમનિર્વૃતાઃ ।
અભ્યવર્ષન્ બલં માલ્યૈઃ શશંસુઃ સાધુ સાધ્વિતિ ॥ ૩૨॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
દશમસ્કન્ધે પુર્વાર્ધે પ્રલમ્બવધો નામાષ્ટાદશોઽધ્યાયઃ ॥ ૧૮॥

## ॥ ૐ નમો ભગવતે વાસુદેવાય ॥

## ॥ એકોનવિંશોઽધ્યાયઃ -૧૯ ॥

શ્રીશુક ઉવાચ
ક્રીડાસક્તેષુ ગોપેષુ તદ્ગાવો દૂરચારિણીઃ ।
સ્વૈરં ચરન્ત્યો વિવિશુસ્તૃણલોભેન ગહ્વરમ્ ॥ ૧॥

અજા ગાવો મહિષ્યશ્ચ નિર્વિશન્ત્યો વનાદ્વનમ્ ।
ઇષીકાટવીં નિર્વિવિશુઃ ક્રન્દન્ત્યો દાવતર્ષિતાઃ ॥ ૨॥

તેઽપશ્યન્તઃ પશૂન્ ગોપાઃ કૃષ્ણરામાદયસ્તદા ।
જાતાનુતાપા ન વિદુર્વિચિન્વન્તો ગવાં ગતિમ્ ॥ ૩॥

તૃણૈસ્તત્ખુરદચ્છિન્નૈર્ગોષ્પદૈરઙ્કિતૈર્ગવામ્ ।
માર્ગમન્વગમન્ સર્વે નષ્ટાજીવ્યા વિચેતસઃ ॥ ૪॥

મુઞ્જાટવ્યાં ભ્રષ્ટમાર્ગં ક્રન્દમાનં સ્વગોધનમ્ ।
સમ્પ્રાપ્ય તૃષિતાઃ શ્રાન્તાસ્તતસ્તે સન્ન્યવર્તયન્ ॥ ૫॥

તા આહૂતા ભગવતા મેઘગમ્ભીરયા ગિરા ।

વન્દ્યમાનચરણઃ પથિ વૃદ્ધૈઃ ।
કૃત્સ્નગોધનમુપોહ્ય દિનાન્તે
ગીતવેણુરનુગેડિતકીર્તિઃ ॥ ૨૨॥

ઉત્સવં શ્રમરુચાપિ દૃશીના-
મુન્નયન્ ખુરરજશ્છુરિતસ્રક્ ।
દિત્સયૈતિ સુહૃદાશિષ એષ
દેવકીજઠરભૂરુડુરાજઃ ॥ ૨૩॥

મદવિઘૂર્ણિતલોચન ઈષ-
ન્માનદઃ સ્વસુહૃદાં વનમાલી ।
બદરપાણ્ડુવદનો મૃદુગણ્ડં
મણ્ડયન્ કનકકુણ્ડલલક્ષ્મ્યા ॥ ૨૪॥

યદુપતિર્દ્વિરદરાજવિહારો
યામિનીપતિરિવૈષ દિનાન્તે ।
મુદિતવક્ત્ર ઉપયાતિ દુરન્તં
મોચયન્ વ્રજગવાં દિનતાપમ્ ॥ ૨૫॥

શ્રીશુક ઉવાચ
એવં વ્રજસ્ત્રિયો રાજન્ કૃષ્ણલીલા નુ ગાયતીઃ ।
રેમિરેઽહઃસુ તચ્ચિત્તાસ્તન્મનસ્કા મહોદયાઃ ॥ ૨૬॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
દશમસ્કન્ધે પૂર્વાર્ધે વૃન્દાવનક્રીડાયાં ગોપિકાયુગલગીતં
નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૩૫॥

## ॥ ૐ નમો ભગવતે વાસુદેવાય ॥

## ॥ ષટ્ત્રિંશોઽધ્યાયઃ - ૩૬ ॥

શ્રીશુક ઉવાચ
અથ તર્હ્યાગતો ગોષ્ઠમરિષ્ટો વૃષભાસુરઃ ।
મહીં મહાકકુત્કાયઃ કમ્પયન્ ખુરવિક્ષતામ્ ॥ ૧॥

તસ્મૈ ભુક્તવતે પ્રીત્યા રામઃ પરમધર્મવિત્ ।
મુખવાસૈર્ગન્ધમાલ્યૈઃ પરાં પ્રીતિં વ્યધાત્પુનઃ ॥ ૪૦॥

પપ્રચ્છ સત્કૃતં નન્દઃ કથં સ્થ નિરનુગ્રહે ।
કંસે જીવતિ દાશાર્હ સૌનપાલા ઇવાવયઃ ॥ ૪૧॥

યોઽવધીત્સ્વસ્વસુસ્તોકાન્ ક્રોશન્ત્યા અસુતૃપ્ ખલઃ ।
કિં નુ સ્વિત્તત્પ્રજાનાં વઃ કુશલં વિમૃશામહે ॥ ૪૨॥

ઇત્થં સૂનૃતયા વાચા નન્દેન સુસભાજિતઃ ।
અક્રૂરઃ પરિપૃષ્ટેન જહાવધ્વપરિશ્રમમ્ ॥ ૪૩॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
દશમસ્કન્ધે પૂર્વાર્ધે અક્રૂરાગમનં નામાષ્ટાત્રિંશોઽધ્યાયઃ ॥ ૩૮॥

## ॥ ૐ નમો ભગવતે વાસુદેવાય ॥

## ॥ એકોનચત્વારિંશોઽધ્યાયઃ - ૩૯ ॥

શ્રીશુક ઉવાચ
સુખોપવિષ્ટઃ પર્યઙ્કે રામકૃષ્ણોરુમાનિતઃ ।
લેભે મનોરથાન્ સર્વાન્ પથિ યાન્ સ ચકાર હ ॥ ૧॥

કિમલભ્યં ભગવતિ પ્રસન્ને શ્રીનિકેતને ।
તથાપિ તત્પરા રાજન્ન હિ વાઞ્છન્તિ કિઞ્ચન ॥ ૨॥

સાયન્તનાશનં કૃત્વા ભગવાન્ દેવકીસુતઃ ।
સુહૃત્સુ વૃત્તં કંસસ્ય પપ્રચ્છાન્યચ્ચિકીર્ષિતમ્ ॥ ૩॥

શ્રીભગવાનુવાચ
તાત સૌમ્યાગતઃ કચ્ચિત્સ્વાગતં ભદ્રમસ્તુ વઃ ।
અપિ સ્વજ્ઞાતિબન્ધૂનામનમીવમનામયમ્ ॥ ૪॥

કિં નુ નઃ કુશલં પૃચ્છે એધમાને કુલામયે ।
કંસે માતુલનામ્ન્યઙ્ગ સ્વાનાં નસ્તત્પ્રજાસુ ચ ॥ ૫॥

અહો અસ્મદભૂદ્ભૂરિ પિત્રોર્વૃજિનમાર્યયોઃ ।

એવં પ્રભાષમાણાસુ સ્ત્રીષુ યોગેશ્વરો હરિઃ ।
શત્રું હન્તું મનશ્ચક્રે ભગવાન્ ભરતર્ષભ ॥ ૧૭॥

સભયાઃ સ્ત્રીગિરઃ શ્રુત્વા પુત્રસ્નેહશુચાऽऽતુરૌ ।
પિતરાવન્વતપ્યેતાં પુત્રયોરબુધૌ બલમ્ ॥ ૧૮॥

તૈસ્તૈર્નિયુદ્ધવિધિભિર્વિવિધૈરચ્યુતેતરૌ ।
યુયુધાતે યથાન્યોન્યં તથૈવ બલમુષ્ટિકૌ ॥ ૧૯॥

ભગવદ્ગાત્રનિષ્પાતૈર્વજ્રનિષ્પેષનિષ્ઠુરૈઃ ।
ચાણૂરો ભજ્યમાનાઙ્ગો મુહુર્ગ્લાનિમવાપ હ ॥ ૨૦॥

સ શ્યેનવેગ ઉત્પત્ય મુષ્ટીકૃત્ય કરાવુભૌ ।
ભગવન્તં વાસુદેવં ક્રુદ્ધો વક્ષસ્યબાધત ॥ ૨૧॥

નાચલત્તત્પ્રહારેણ માલાહત ઇવ દ્વિપઃ ।
બાહ્વોર્નિગૃહ્ય ચાણૂરં બહુશો ભ્રામયન્ હરિઃ ॥ ૨૨॥

ભૂપૃષ્ઠે પોથયામાસ તરસા ક્ષીણજીવિતમ્ ।
વિસ્રસ્તાકલ્પકેશસ્રગિન્દ્રધ્વજ ઇવાપતત્ ॥ ૨૩॥

તથૈવ મુષ્ટિકઃ પૂર્વં સ્વમુષ્ટ્યાભિહતેન વૈ ।
બલભદ્રેણ બલિના તલેનાભિહતો ભૃશમ્ ॥ ૨૪॥

પ્રવેપિતઃ સ રુધિરમુદ્વમન્ મુખતોऽર્દિતઃ ।
વ્યસુઃ પપાતોર્વ્યુપસ્થે વાતાહત ઇવાઙ્ઘ્રિપઃ ॥ ૨૫॥

તતઃ કૂટમનુપ્રાપ્તં રામઃ પ્રહરતાં વરઃ ।
અવધીલ્લીલયા રાજન્ સાવજ્ઞં વામમુષ્ટિના ॥ ૨૬॥

તર્હ્યેવ હિ શલઃ કૃષ્ણપદાપહતશીર્ષકઃ ।
દ્વિધા વિશીર્ણસ્તોશલક ઉભાવપિ નિપેતતુઃ ॥ ૨૭॥

ચાણૂરે મુષ્ટિકે કૂટે શલે તોશલકે હતે ।
શેષાઃ પ્રદુદ્રુવુર્મલ્લાઃ સર્વે પ્રાણપરીપ્સવઃ ॥ ૨૮॥

ગોપાન્ વયસ્યાનાકૃષ્ય તૈઃ સંસૃજ્ય વિજહ્રતુઃ ।
વાદ્યમાનેષુ તૂર્યેષુ વલ્ગન્તૌ રુતનૂપુરૌ ॥ ૨૯॥

જનાઃ પ્રજહૃષુઃ સર્વે કર્મણા રામકૃષ્ણયોઃ ।

